णे नानर्थकस्येति परिभाषया अर्थवदेवेति शब्दस्य ग्रहणेन ननिषेधस्यान्यर्थत्वं संभवति इते स्तिशब्दस्यानर्थ
कत्वात् तथा चोक्तं तत्रैव भाष्ये ननु चोक्तं उत्यर्थमेतत् स्यादिति युक्तार्थवद्ग्रहणे नानर्थकस्येत्यर्थवत् शिब्दस्यग्र
हणं नच उक्तेस्तिशब्दोऽर्थवानितिवाच्यम् उभयसंभवेऽस्यि परिभाषोपतिष्ठते नचतिशब्दस्योभयसंभवः अन
र्थकस्यैव सर्वत्र दर्शनात् इति सामर्थ्यादनर्थकस्यैव सर्वत्र ग्रहणं उत्यर्थत्वाच्चस्यते परिहृत आह शदंता ।

प्रकृते बहादीनां संख्यासंज्ञा कृतेति ज्ञानत्रयं प्रकरणम् ननु लोकप्रसिद्धैकद्व्यादीना
मित्यत आह उभयगतिरिह भवति इह शास्त्रे संख्याया अति शदंतायाः इति निषेधोऽस्या
ज्ञापकः नहि कृत्रिमासंख्यात्यंत शदंता वास्ति ॥ वास्तीति अर्थवद्ग्रहणेति ज्ञापक

व्यवस्था परभाष्यं तु ति शब्दे सोच्चारणकालिकार्थवत्त्वमादाय व्यवस्थापनीयम् इत्युक्तप्रकरणेन त्विसादिना शंक्यो नैष
दोष इत्युक्तानदाहतत्रैव कैयटः अभिशदंतापाउच्चारणकाल एवार्थवानस्तिशब्दस्य ग्रहणमिति प्रतीतिरिति ज्ञापकत्व
मेव प्रतिषेधस्येति अतिशदंताया इत्यस्य बहुव्रीहिगर्भतत्पुरुषत्वेन संख्याविशेषणत्वात् तया विशिष्टबुद्धौ विशेषणज्ञानस्य का
रणत्वात् तत्पदजन्योपस्थितिकाले अर्थवदनर्थकयोः संभावेन इत्यर्थमर्थवदेव ग्रहणे निर्णीते पश्चात् संख्यापदार्थान्वयवे ।
लायां ज्ञायमानानुपपत्तिज्ञानेन ज्ञापकत्वमेव कल्प्यत इति नैष दोष इति प्रतीकमुपादायोद्धाटितस्य कैयटस्याशयो वि
वरणकारेण ॥ ॥ ॥

२३




इदानींतस्याः परिभाषायाः फलमाह तेनेति लौकिकेति तत्त्वं च शास्त्रीयसंकेतिकार्थभिन्नत्वेनेवेदितव्यं न तूभय
गतिरितिप्रतिकर्तीकर्मण्यादौ फलकथमयुक्तं तत्रोभयग्रहणसंभवेन संख्यास्य लोपवनकालस्य युक्तं युक्तत्वादि
त्यत आह तत्रेति केति नन्विह उभयगतिरित्यस्य कृत्रिमाकृत्रिमयोरेकत्र वगतिर्भवतीत्यर्थः अपितु विषयेभे।
देनकृत्रिमाकृत्रिमयोर्यस्तत्पोत्तमस्तयोश्च ग्रहणमिति तदर्थः तथा च कुत्रचित्कृत्रिमस्यैव ग्रहणं यथा द्वि

तेन कर्तरि कर्मव्यतिहारे करणेऽवमेयेभ्यः करणे विप्रतिषिद्धं चानधिकरणे इत्यादौ लौ
किककृतिनायाद्व्यायवगतिः तत्र कोभयगतिः क्वाकृत्रिमस्येव कृत्रिमस्येवेत्यु।
उत्तलक्ष्यानुसारिव्याख्यानमेव शरणम् अत एवाम्रेडितशब्देन कृत्रिमस्यैव ग्रहणं
न तु द्विःप्रयुक्तमात्रस्य


रादेशित्यादौ कुत्रचिन्नकृत्रिमस्यैवग्रहणं यथापूर्वोक्तोदाहरणे कर्तरि कर्मेत्यादौ कुत्रचिदुभयग्रहणं यथासं
ख्या व्यपास्त्रेत्यपि अत्र लक्ष्यानुसारिव्याख्यानस्यैव शरणीयकर्तव्यत्वान्न पूर्वोक्तदोषावकाश इति अत्रमूलं तत्रे
ति निर्ह्रासमर्थः तेषां त्रयाणां मध्ये इत्यर्थः अत एवेति तथाविधव्याख्यानस्य शरणत्वादेवेत्यर्थः ॥२॥



बहुगणवतुडतिसंख्येति सूत्रे संख्यासंज्ञायां संख्याग्रहणं संख्याग्रहणं कर्तव्यं बहुगणवतुडतयः संख्यासंज्ञा भवं
ति संख्या संख्यासंज्ञा भवतीति वक्तव्यम् किं प्रयोजनम् संख्यासंप्रत्ययार्थम् एकादिका संख्यायाः संख्याप्रदेशेषु सं
ख्येत्येव संप्रत्ययो यथा स्यादिति संख्याग्रहणस्य कर्तव्यता चोदितत्वात् तत्प्रत्याख्यानाय तत्रापि एकादिना उभयगतिं साधय
ता भगवता भाष्यकृता स्पष्टीकर्तुमनेन इत्याह स्पष्टं चेदमिति अस्मिन्नेव सूत्रे भाष्ये कृत्रिमाकृत्रिमयोरिति प्रतीकमु
पादाय न्यायोऽयम् तथा हि सर्वार्थाभिधानशक्तियुक्तः शब्दो यदा विशिष्टे संव्यवहाराय नियम्यते तदा तत्रैव प्रती

स्पष्टं चेदं संख्यासंज्ञासूत्रे भाष्ये एतत्संज्ञाशास्त्राणामच्छास्त्रेः नेन शब्देनैत्वप्रवे
तिनियमार्थत्वं कृत्रिमाकृत्रिमन्यायबीजमिति तत्र तेषामगृहीतशक्तिग्रा
हकत्वेन विधित्वे संभवति नियमत्वायोगात्


नीं जनयति नान्यत्रेति कैयटोक्तिमर्थतो युक्तेत्यादिनाऽनूद्य खंडयति तत्रेत्यादिना सति नियामकत्वे हि
सति निःसंज्ञाशास्त्राणां कैयटोक्तरीत्या कृत्रिमाकृत्रिमेति न्यायमूलं भवेन्नाम तदेव तु न भवति अगृहीतशक्तिग्रा
हकत्वेनैतेषां विधित्वे संभवति स्वरूपस्य शक्तिग्राहकत्वेन नियामकत्वकल्पनायोगात् ॥ ॥



ननुसर्वेसर्वार्थवाचकाइतिप्रकृतशास्त्रकृत्सिद्धांतानुरोधेनसर्वार्थेषुसर्वशब्दानांशक्तेर्ग्रहीतत्वेनग्रहीतश-
क्तिग्राहकत्वेनकथंननतेषांनियामकत्वंसंभवेदित्याह सर्वेसर्वार्थेति तादृशसिद्धांतानुरोधेनसामान्यशक्तिग्रहे-
पिविशिष्यतत्तदर्थज्ञानाभावेनविशेषतस्तत्तदर्थेशक्तेरग्रहीतत्वाद्विधित्वमेवसंभवतिननियामकत्वमितिभावः
ननुसामान्यज्ञानमादायैवनियामकत्वंकुतोनेतिचेदत्राहः सामान्यज्ञानंत्विति सामान्यशक्तिग्रहस्यविशेषशा-

सर्वेसर्वार्थवाचकाइत्यभ्युपगमोपियोगिदृष्ट्यानास्मदृष्ट्याविशिष्यसर्वशब्दा-
र्थज्ञानस्याशक्यत्वात् सामान्यज्ञानंतुनबोधोपयोगीति ॥

द्बोधोपयोगित्वाभावात् ननकिंचित्किंरं अन्यथातादृशसिद्धांतानुरोधेनतादृशशक्तिग्रहेविशेषतः सर्वार्थ-
ज्ञानेसर्वेषांसर्वज्ञत्वापत्तेः तस्माद्विशेषज्ञानस्यैवकार्यनियामकत्वाद्विशेषतः शक्तेस्त्वाग्रहीतत्वात्तदर्थमग्र-
हीतशक्तिग्राहकत्वेनसंभवत्येवसंज्ञाणत्वाएणंनियामकत्वासंभवइति ॥ ॥ ॥


नन्वेनावतापि कृत्रिमाकृत्रिमयोरित्यन्यायस्य मूलं तु न सिद्धं भवतीति निर्मूलत्वादप्रामाणिकः स्यात् किंचैवं व्य
वहारापनियमः संज्ञायाः सत्विनिकृचिदित्यादिहरिग्रंथासंगतिस्यादि चेत्तर्हि तत्संज्ञाकरणज्ञानरूपप्रकरणस्या
र्थाग्रहणरूपनियमं कृत्रिमान्यायमूलत्वपा संख्यासंज्ञासूत्रस्य भाष्योक्तं गृहाण इति न कृत्रिमन्यायोऽप्रामाणिकः तत्र
तत्र संकेतोगृहीतेन तत्संकेतज्ञानरूपप्रकरणवशात्तस्यैवोपस्थितिर्नान्यस्येति फलितनियमपरत्वेन हरिग्रंथस्यापि ना
संगतिरित्याह अन्यत्र निरूपितमिति वृद्धिरादैजितिसूत्रे शेखरे मंजूषायां चेति शेषः तत्र आदैचां गुणसंज्ञाप्रदेशु

अन्यत्रनिरूपितम्

वृद्धिसंज्ञाकुतोनेत्याशंकां मनसि निधाय तत्रैव संकेतिताहस्या सूत्रकरणे सेष्टैवेत्येषां पदृष्टाशक्तत्वेन व्यवहारः
स्वेष्टपासंज्ञाक्रियत इति च एतदुपदेशरूपसंकेतात्माकृतत्र संज्ञात्वाग्रहेतासामनित्यत्वमव्यवहारविशेषवरंग्रथः
तत्रात एव तत्संज्ञाकरणज्ञानरूपप्रकरणादन्यार्थाग्रहणरूपनियमं कृत्रिमाकृत्रिमन्यायमूलमयोक्तं संख्यासं
ज्ञासूत्रे भाष्ये आर्थिकमेवामुं नियममादाय संज्ञासूत्रे श्रुतिनियमनव्यवहारोव्यवहारनियमः संज्ञायाः सत्विनिक्व
चिदिनाकृत तत्सुपष्टंभकग्रंथनिरूपणेन निरूपितमिति बोध्यं ॥




इदानीं सिंहावलोकनन्यायेनोक्तं तिकविशेषोदेश्यकविधौ विचारं स्तुवन् नहि कार्यार्थी निपरिभाषामवतारयति
नन्वेवमित्यादिना शपितेत्यादावित्यत्रादिपदेन शपित इत्यादिसंग्रहः अत्र हि निष्ठाशीडि.ति निष्ठायाः कित्त्वनिषेधः
डि.त्वाद्गुणनिषेध इति ङ्कि.ति चेति सूत्रे सनि सप्तम्या आश्रयणादिति भावः नच निष्ठाशीडि.ति शीङः कित्त्वनि
षेधसामर्थ्यादेव सप्तमीनास्तीति कल्प्यते इति वाच्यम् तन्निषेधसार्थक्यापसनि सप्तम्यभावकल्पनायेत्त

नन्वथेताशपितेत्यादौ इड् शीङो ङि.त्वाद्गुणनिषेधः स्यादत आह कार्यमनुभ
वन् हि कार्यी निमित्ततया नाश्रीयते ॥

यापरिभाषात्तापनस्यैवौचित्यात् सनि सप्तमीति कल्पनायामपि ङ्कि.ति चेत्यस्याप्रवृत्तिमात्रकल्पनेनैव निष्ठाशी
डि.ति निषेधसार्थक्ये तेन सप्तमीसप्तम्यभावकल्पनस्यायुक्तत्वाच्च ॥ ॥ ॥ ॥




प॰रि॰शे

परिभाषायां ज्ञापकमाह स्यंनिलाच्छपिनरिति एतेन अस्यां परिभाषायां दिधीवेव्योर्गुणप्रतिषेधः कुटादौ कु
ङ॰पादेवा ज्ञापकमिति सीरदेवायुक्तिरपास्ता भाष्ये दिधीवेवीटामित्यस्य प्रत्याख्यानात् पाठस्याशोकवनिकन्या
येन चरितार्थताच्च निर्देशश्चेति पादे तन्निर्देशश्चेत्यत्र त्यच शब्देन निषेधस्य प्रकारान्तरेण दिधीवेव्योः प्रत्याख्यानप
रभाष्यस्य समुच्चयः अन्यथा ङ्किति चेति निषेधेनैव सिद्धेव प्रकारान्तरानुशरणमयुक्तं स्यात् परिभाषास्य अनु

२९

स्यंङिलाच्छपिनरीतिनिर्देशश्चास्या ज्ञापकः ऊर्णोनविषतीत्यादिसिद्धये कार्यमनुभ
वनिति अत्र हि द्विर्वचने चीति नुशब्दस्य द्वित्वमन्यथा सन्यङोरित्यस्य षष्ठीत्वात्तत्र
तस्य कार्यित्वेन सो द्वित्वनिमित्ताभावात्तत्प्रवृत्तिर्न स्यात् ॥


परिभाषास्य अनुभवन् पदस्य कर्मत्वं दर्शयति ऊर्णोनविषतीत्यादि स्तिचपे कार्यमननतथा च अप्येताशपितविस्यादि
तो ऊर्णोनविषतीत्यत्रैवेलक्षणं दर्शयन् तदेव स्पष्टयति अत्र हीति एतेन परिभाषाद्वयमिदमिति सीरदेवायुक्त
मपास्तम् ॥ ॥



ननु कार्यीनिमित्ततयानाश्रीयत इत्यत्र समवायसंबंधेन कार्यमस्मिन्नस्तीति मत्वर्थीयेन इना कार्यीशब्दः समवापिका
रणपरः निमित्तशब्दश्चासमवापिकारणासमवापिकारणपरः समवापिकारणत्वं च समवायसंबंधावच्छिन्नकार्य।
तानिरूपिततादात्म्यसंबंधावच्छिन्नद्रव्यत्वसमानाधिकरणकारणताश्रयत्वं समवापिकारणत्वं तु गुणत्वकर्म
त्वासंतानावाधिकरणनिरूपितवृत्तित्वाभाववत् धर्मावच्छिन्नसमवायसंबंधावच्छिन्नकार्यतानिरूपितकारण
ताश्रयत्वम् निमित्तत्वं निरुक्तोभयधर्मानवच्छिन्नकार्यतानिरूपितकारणताश्रयत्वम् इति निखिललोकन्ये
पापिकादिशास्त्र प्रसिद्धिः एवं च समवापिकारणनिमित्तकारणयोः सकललोकतन्त्रप्रसिद्धस्पष्टभेदकत्वात्र

वस्तुतः समवापिकारण


समवापिकारणस्य निमित्ततयाश्राश्रयणम् निमित्तस्यैवानत्वेनाश्रयणं इदं तु बोध्यम् यस्मिन्कार्ये यस्य समवा
पिकारणत्वं तस्मिन्नेव तस्य निमित्तत्वेनानाश्रयणम् इतरत्र समवापिकारणतयाश्रागश्रितस्याप्यन्यत्र निमित्त
त्वेनाश्रयणेऽपि न बाधकम् यथा दंडादस्य स्वरूपं प्रति समवापिकारणतयाश्राश्रितस्यापि घटं प्रति निमित्तत्वेनाश्रयणं
भवत्येव अन्यथा कार्यमात्रं प्रति समवापिकारणतयाश्राश्रीतस्य द्रव्यस्य कुत्रापि निमित्तत्वानापत्त्या सर्वोपप्लव एव स्या
दिति तस्मात्समवापिकारणस्य निमित्तत्वेनाश्रयणाभावेन परिभाषायाः अर्थसिद्धत्वात्तत्तज्ज्ञापकाश्रयणं किंचि
त्करमिति चेदाशिष्यं गीकुर्वन्नाह वस्तुत इति नैव स्पष्टयति समवापिकारणेति ॥ ॥ ॥



ननुसमवायिकारणनिमित्तकारणयोः सकललोकतंत्रप्रसिद्धभेदस्य सत्वेपीह व्याकरणे तयोर्भेदो नाश्रीयते सि
द्धप्रसिद्धस्मानुशासनेस्मिन वस्तुतोसत्वेन सर्वस्य व्यवहारस्य तत्वादित्यत आह अत एवेति ज्ञापकसाध्यत्वाभा।
वादेवेत्यर्थः हिः प्रयुक्त इति परिभाषायामितियावत् सहीतिदिशाहोहीत्यर्थः तत्वेनाश्रयण इति कार्यिणोनिमि

निमित्तकारणयोर्भेदस्य सकललोकतंत्रप्रसिद्धत्वात तस्य तत्वेनाश्रयणाभावेन नै
षा ज्ञापकसाध्या अत एव हि प्रयुक्तः सहितत्वेनानाश्रयणे हेतोः प्रसिद्धत्वं यो तप
नीतितत्वम् ध्वनिताचेयम्


तत्वेनानाश्रयणे इतियावत् तथा सिद्धानुशासनेऽस्मिन् शास्त्रे सर्वव्यवहारस्य काल्पितत्वेपि यथोत्तरमीमांसक
नयेकल्पितव्यवहारमादायैव मोक्षवंधादिसर्वव्यवस्था तथात्रापि तमेवादाय सर्वव्यवस्थापालनस्य सिद्धेर्यत्वेन
भाष्यकारैरप्यंगीकृतत्वात्तन्निखिललोकप्रसिद्धस्य अन्यत्र तंत्र सिद्धस्यैवात स्याश्रयणे किंचिद्बाधकमिति भाव



नन्वेतस्याः परिभाषायाः भाष्यानुक्तत्वादप्रामाणिकत्वमित्यत आह द्विर्वचनेचीत्यत्रेति तत्र हि अनेन कार्य
मतिदिश्यते इति मनसि निधाय आदेशः स्थानिवदनादेशात् हलो द्विर्वचनमिति चक्रतुरित्यत्र यणादेशे कृते एका
चो विधीयमानं द्विर्वचनमनच्कत्वादप्राप्तमिति स्थानिवत्त्वात् परमविशिष्टस्यैव स्यादित्याशंकायाच् ग्रहणं तज्ज्ञा
पकं रूपस्थानिवद्भावस्य यदयमच् ग्रहणं करोति तत् ज्ञापयत्याचार्यः रूपं स्थानिवद्भवतीति कथं कृत्वा ज्ञाप

द्विर्वचनेऽचीति सूत्रे भाष्ये ॥

कं अच् ग्रहणेऽस्यैतत् प्रयोजनं रहमास्तलजेद्वीपतेर्देध्मीयते यदि च रूपं स्थानिवद्भवति ततोऽच् ग्रहणमर्थवद्भव
तीतीत्यच् ग्रहणं ज्ञापकाश्रयणेन रूपातिदेशपक्षावलंबनात् परिहृतम् अत्र यदि च रूपं स्थानिवद्भवति ततोऽ।
च् ग्रहणमर्थवदित्यंतोक्त्याऽच् ग्रहणे न सर्वेष्टसिध्यर्थं रूपातिदेशं ज्ञापयता न हि कार्यी परिभाषोध्वनिता भग
वता यदि चेयं न स्यात्तत्सर्वथाच् ग्रहणमरिरिष ॥ ॥ ॥



प॰रि॰शे॰
टी॰


२८

नीत्यत्रगुणस्यइस्त्निमित्तस्यस्थानिवद्भावेनइस्त्शब्दस्यशष्टत्वेनसिध्येतेनेति अच्ग्रहणेनज्ञापितरूपातिदेशस्य
सर्वेष्टसिध्यर्थत्वप्रतिपादनपरंभाष्यमयुक्तंस्यात् ध्वनितापांतु परिभाषायांकार्यिणोनिमित्तत्वानाश्रयणेनेसो
ढित्वनिमित्तत्वानाश्रयणेभावेनद्विर्वचनेचीतिसूत्रेणस्थानिवद्भावेनरूपातिदेशाप्रसक्तेर्नेस्त्शब्दस्याद्वित्वमि
तिसर्वेष्टसिद्धौभाष्यंसमंजसंभवति यत्तुद्विर्वचनेऽचीतिसूत्रे अचीत्यस्यजेघ्रीयतेदेध्मीयते इतिनिवृत्तकारैः
प्रत्युदाहरणमुक्तंयच्चभाष्यकारैः रूपातिदेशेज्ञापकत्वमुक्तंतदुभयमपिचिंत्यम् नटभार्यावद्व्रजमानिभवं
नीतिषष्ठभाष्यारीत्याघ्रीम् ध्मीयतेतिद्वितीयाजवधिकस्यैवकार्यित्वापत्तेः निमित्तत्वाभावादितितदेवचिंत्यम्
सत्युत्तरस्मिन्नचिनत्संबंधेनतरगत्वस्यैवव्यंजनस्यसर्वप्रसिद्धत्वात् यकारविशिष्टस्यषाष्टभाष्यानुरोधेनका
र्यित्वापादानस्यायुक्तत्वात् नचविनिगमनाविरहः धातोरेकाचः इतिसूत्रेणविहितः यङः अस्त्यज्यंतरेअका
रोत्तरयकारस्योच्चारणेतदंगत्वकल्पनस्यैवन्याय्यत्वात् रूपातिदेशात्ज्ञापकात्परभाष्यप्रामाण्यादुत्तरांगसंबं
धेनउत्तरांगत्वस्यैवज्ञापयितुंयुक्तत्वाच्च ॥ ॥

इदानीं संज्ञाप्रसंगादेवसंज्ञाकर्मकसंज्ञिविशेषोद्देश्यके विधौ विचार इति तच्च पनपदागमपरिभाषामवतारयितु
माह नन्वित्यादिना इदानीं परिभाषास्य पदानां आदिभूतपदागम इति समस्तपदे समासचटकीभूत सर्वपदाव्य
वहितोत्तरवर्त्तित्वषष्ठ्यर्थः नसंबंधसामान्यमपि तु उद्देश्यविधेयभावरूपएव अन्यथा प्रतिदारयतीत्यादौ सोद्देश्यत्वघटितस
मुदायत्वसंबंधेन रेफस्य दासंबंधित्वेन तद्ग्रहणेन ग्रहणात् एत्वमापद्येत पूर्वोक्तानुसारेणोत्वस्य निष्टविधेयता

ननु प्रणिदापयतीत्यादौ दारूपस्य विधीयमानायु संज्ञादापेनं स्यादत आह यदा
गमास्तद्गुणीभूतास्तद्ग्रहणेन गृह्यंते यत्तु दिश्यागमो विहितः शास्त्रेण तदेव।
यवत्वेनबोधितो इ तद्ग्रहणेनेत्यत्र ग्राहकेण तद्बोधकेन शब्देन गृह्यते बोध्यत इत्य
र्थः


नितपित उद्देश्यतासंबंधेन रेफस्य आकारसंबंधित्वे पितत्वाभावान्न दोषः तद्गुणीभूत इत्यत्र गुणशब्दोऽवयवपरः
आत्रयिप्रत्ययेन वास्तवतत्वाभावेन शास्त्रीयत्वारोपितत्वमित्यस्य चितं अत्र तद्गुणेनेति तद्ग्रहणशब्दः तद्ग्राहक
परः मध्ये इत्यत्र तत्वज्ञानार्थक इति पदागमादि पदार्थनिरूपणद्वारा परिभाषार्थं व्याचष्टे यत्तु देश्येत्यादिना यत
तदोर्नित्यसंबंधादाह स इति ॥ ॥ ॥ ॥ ॥ ॥



ननुपदागमपरिभाषायांउपात्तस्यतद्गुणीभूतेनतस्यकस्यचिदपूर्वार्थस्यासाधकत्वेनचवैफल्यंसंपादितांशंकांतस्य
तस्यसाधकत्वेपिलोकन्यायसिद्धेयमितिप्रतिपादनेसफलत्वान्नवैफल्यमित्याशयेनपरिहरति तत्रेति परिभाषा
यामित्यर्थः तद्गुणीभूतइतिपाठेतत्रत्यस्यैवाख्यानेरित्यर्थः तद्गुत्वेनलोकन्यायसिद्धत्वमेवप्रतिपादयति लोके

तत्रतद्गुणीभूतस्यांशोबीजकथनंलोकेपिदेवदत्तस्यांगाधिक्येतद्धिशिष्टस्यैवदेवदत्त
ग्रहणेनग्रहणंदृश्यते यथोद्देशपक्षागमोविहितश्रुतेः प्रतिदारपतीत्यादौनद्दारि
त्वस्यप्रत्वम् ॥


पीत्यानिना प्रत्रापिशद्वःशास्त्रसमुच्चायकः यद्वागमस्त्यत्र उद्देश्यविधेयभावएवेष्टार्थः ननुयथाकथंचित्संबंध
मात्रमित्यभ्युपगमस्यफलमाह यथोद्देशेति ॥ ॥ ॥ ॥



ननुदिदीपेइत्यादौअनयापरिभाषयाषष्ठीविशिष्टस्यैकारग्रहणेनग्रहणात् यणस्यात् जहाहेत्यादौचातआण
लइत्यौकारोदेशापत्तिः तथाचलोकन्यायसिद्धस्यैतद्वचनस्यअतिव्याप्तिनस्त्वेनशास्त्रेएतदाश्रयणमयुक्तंस्या
दित्यत आह आनेमुगिति मुग्विधानसामर्थ्यादेतस्यानित्यत्वकत्वकल्पनेनानिष्टातिरिक्तस्थलेसंकोचकल्प
नेननायुक्तत्वम् अतएवकन्येजत इतिसूत्रेभाष्येपाठ्येतस्याःपरिभाषायाःप्रयोजनत्वानितदर्थमेषाकर्तव्यात्र
तिविधेयंदोषेषुइत्युक्तं सन्निपातपरिभाषादोषपरिगणनानंतरंपरिभाषाव्यवस्थापनावसरे ननुआनेमुगि


आनेमुगितिमुग्विधानसामर्थ्यादेवानित्या अन्यथापचमानइत्यादावकारस्य
मुक्तस्यानयापरिभाषयाविशिष्टसवर्णदीर्घोनवैयर्थ्यंस्पष्टमेव ॥ ॥

ति सूत्रेणमुग्विधानंहिश्रवणार्थम् यदिचयदागमपरिभाषयाकःसवर्णेदीर्घःस्यात्तदातदनुपपत्त्रंस्यादतआ
त्वोपपत्त्यर्थेनत्रपचमानेत्यादौपरिभाषायाअप्रवृत्तिकल्पनीतिनानित्यत्वज्ञापकत्वंतस्यसंभवतीतिचेन्नसा
मर्थ्येननपरिभाषायाअप्रवृत्तिकल्पनापेक्षयातस्यापरिभाषायाअनित्यत्वज्ञापकस्यलघुत्वबहुफलसाधकत्वाभ्या
मुचितत्वात् अनित्यत्वकल्पनेननस्या अप्रवृत्तेरार्थिकत्वेनान्यथासिद्धत्वाच्च नन्वेवमत्रापिपचआनइत्यवस्थायांआ
मस्याकःसवर्णेदीर्घइतिदीर्घस्यविशेषविहितेनातोङितेइत्यनेनबाधेनस्याथपवादत्वा ॥ ॥ ॥




नुकाबाधनापमुग्विधानस्यचारितार्थ्येनएतत्परिभाषायाअनित्यत्वज्ञापनमयुक्तम् नचक्वचिदपवादविषयेप्युत्सर्गो
ऽभिनिविशते इतिन्यायेन रमायामित्यादाविव पुनरुत्सर्गप्रवृत्तिस्वीकारेणास्त्यपिमुक्कि इयादेशप्रवृत्तिरस्याहृतेनैवेतिवाच्य
म् सर्वथानवकाशस्थलेतथासत्वेऽपियेननाप्राप्तिन्यायेनबाधकस्थलेतथानंगीकारात् नचअपवादशब्देनैवतत्रये
ननाप्राप्तिन्यायस्यग्रहणं भविष्यतीति वाच्यम् तत्रापवादशब्दस्यबाधकत्वोपलक्षणत्वास्पष्टीभविष्यतिचेतदुपरि।
ष्टात् नचैवंमुक्कि सतिइयादेशप्रवृत्तिंपरिभाषयाशंक्यवर्णग्रहणेपदागमइत्यस्याप्रवृत्त्यानदोषइति आनेमुगि।
ति सूत्रस्थंविवरणंविरुध्येतेतिवाच्यम् तस्यप्राचीनानुरोधित्वकल्पनेनविरोधाभावात् नचैतावतापियेननाप्राप्ति
न्यायेनइयादेशबाधेनमुक्कितत्स्थले अपवादविषये उत्सर्गप्रवृत्त्याइयादेशप्रवृत्तावपिसवर्णदीर्घेणकिं।
चिद्बाधकमितिवाच्यम् आनोडि·तत्रस्यस्थानंतरंआनस्यनअग्रेमुगितिन्यासेनआतोडि·तइत्यंतआनइत्य।
स्यअनुवृत्त्याआनस्यातोइयादेशेनआनेआउतिन्यायेनबाइयादेशप्रवृत्तिनोसवर्णदीर्घस्यैवमुग्विधानस्यबा
धकत्वात्तरंनदप्रवृत्तेरितिचेन्न॥ निरवकाशत्वेनमुकादीर्घस्यबाधेअपवादविषये उत्सर्गशास्त्रस्यप्रवृत्तेरभ्युप
गमात्तउरंपदागमपरिभाषयासवर्णदीर्घमुग्विधानवैयर्थ्यस्यात्तत्त्वेनपरिभाषायाअनित्यत्वज्ञापकस्यायु
क्तत्वात् नन्वेवमपिपदागमपरिभाषयामगागमस्यावर्णत्वेनग्रहणंस्यतओष्टत्वंच तथासतिआनसंबं
धिअचि आदावाङ्ग्रहणइति इतिओकाररूपनगणास्य

॥ ॥ ॥ ॥



पादेनेनतस्य चारितार्थ्यान्नानित्यत्वज्ञापकत्वमिति चेन्न पदागमपरिभाषयानन्त्यावर्णत्वातिदेशवत्कंठ्यत्वस्याप्या
तिदेशोस्याश्रयओष्ठत्वस्यप्रतिबंधात् नचकंठ्यत्वातिदेशोप्यमितिसमुदायस्यनत्वेपिअकारैकदेशरेफापेक्षस्पृष्ट
प्रयत्नमादायअकारस्यैकेषत्स्पृष्टप्रयत्नवत् अमितिसमुदायैकदेशमकारसादृश्यमादायओकाररूपगुणस्या
पिदुर्वारत्वमिति वाच्यम् रोचोश्वानरम्यपत्वादितिवत्पूर्वभागस्यवाङ्कुल्येनतत्सादृश्यमादायओकारस्याप्राप्तेः
गुणप्रतिसवर्णदीर्घस्यापवादत्वाच्चेतिदिवः तथाचपदागमेतिन्यायसिद्धस्यवचनस्यनिपातनकाभावाल्लक्ष्या
लक्ष्यसाधारण्येनाव्याहतप्रसक्तौमुग्विधानमन्यथानुपपत्तिमूलकं यत्रैतस्यमहत्तोलक्ष्यविधानस्तत्रैवतन्त्र।
प्रवर्तते इतिवचनांतरकल्पनेनअलक्ष्यातिरिक्तविषयत्वेनैतस्यसंकोचेमिथ्यात्पत्तस्यैवमनित्यत्वम् लक्ष्यालक्ष्य
विवेकस्तुसूत्रभाष्यवार्तिकतोवधेयः एतेनमुग्विधानपरिभाषायाअनित्यत्वेपिकर्षत्रहूतिरितिविनिगम
नाविरहेश्रोतेलक्ष्यानुरोधादमुकस्थलेप्रवृत्तिरमुकस्थलेनेतिमुग्विधानसामर्थ्याद्वा इतिसमाधानेमंततोग
त्वाशरणीपंतदपेक्षयापूर्वमेवतदनुरोधान्मुग्विधानसामर्थ्याद्वासवर्णदीर्घेकर्तव्येश्रयंनप्रवर्तत इतिकुतो
नत्ताप्यताभित्यपास्तम् अलक्ष्यमात्रातिरिक्तविषयत्वेनसंकोचेसंभवतिसति अलक्ष्यविशेषविषयत्वेनसंको
चकल्पनस्यायुक्तत्वात् असतिबाधकेप्रमाणानांसामान्येपक्षपात इतिन्यायाच्च श्रीमत्प्रणवादिनामतीर्थपय

॥ -- इन्द्रायनमः ॥ ॥ ॥




प॰रि॰शे॰
टी॰
३१
31

परिभाषायाअनित्यत्वज्ञापनेनतदप्रवृत्तियोग्यंस्थलंदर्शयति तेनेति दिदीयेरति अनित्यत्वेनेत्यर्थः तत्त्वेन
वृद्धिस्यपरामर्शकतयाअनित्यत्वपरामर्शात् नचात्रापिवुग्वृद्धिविधानसामर्थ्यैनेवारणेनानित्यत्वफलमप्रयुक्तं।
वक्तुमितिवाच्यम् इहपदद्वयसंपादनेनवुग्विधानस्यचारितार्थ्यात् नचपरेणमपशतिवार्तिकेनअसत्यपिवुदि।
तत्सिद्धिरितिवाच्यम् अंतर्भूतनिमित्तकत्वेनांतरंगेणपरेणमपशतिद्वित्वेवहिर्निमित्तकत्वेनवहिरंगस्यपरेणोऽसि
द्धत्वात् द्वित्वाप्रवृत्तेः नचैवंकुंथकर्त्स्मनेत्रिपायांवहिरंगपरिभाषायाअप्रवृत्तेरभ्युपगमात् वहिरंगपरिभाषा।

तेनदित्तीपेत्यादौपणादिन् जहारेत्यादौचानग्लोपणालितिन् नचैकादेर्वर्णस्यवर्णां
तराव्यवः कथमितिवाच्यं वचनेनावयत्ववोधनात् तस्यचावयवसाद्दस्यपर्यव
सानंवोध्यम्

यासमाधानमयुक्तमिति वाच्यं एवमपिपकारत्रपश्रवणार्थत्वेनतस्यावश्यकत्वात् नचैवमपिहलोपमांयमाति
लोपेनडावेवावशिष्येतेतिवाच्यम् तस्यैकेकल्पीनत्वात् स्पष्टंचेदंहपवरडितिसूत्रेभाष्ये नत्वेवमप्यत्रवुग्युटाविति
वार्तिकारंभसामर्थ्यैनेवपरिभाषायाअप्रवृत्तौकल्पमानायांनानित्यत्वज्ञापनस्यफलं युक्तमित्यरुचेराह जहारे
त्यादौचेति चशब्दोऽत्रवार्थेपूर्वोक्तेरुचिसूचकएव ॥ ॥ ॥

३१


नचयथाआनेमुगितिमुग्विधानसामर्थ्यात् परिभाषानित्यत्वंज्ञाप्यते तथादिनिगमनाविरहाद्वर्णग्रह
णेऽयंनप्रवर्तत इतिज्ञापनेपिभवदसिद्धौअनित्यत्वज्ञापनमयुक्तमित्याशंकते नचेति किंविशेषणतयायत्रव
र्णग्रहणंतत्रेयंनप्रवर्तत इतिज्ञाप्यतेउतविशेष्यतद्ग्रहणंतत्रनेति इति विकल्पमनसिनिधायतत्रआनेमु
गितिसूत्रस्यभाष्यासंगत्याआद्यंनिराचष्टे आनेमुगितीति उ.मृदसूत्रस्यभाष्यासंगत्याअंत्यंनिराचष्टे किंचेति न
याचपदिविशेषणतयावर्णग्रहणेऽयंपरिभाषानप्रवर्तेततदाप्रगावपवीभूतस्यअकारस्य मुगित्यानेमुगिति

नचोक्तज्ञापकाद्वर्णग्रहणेऽस्याअप्रवृत्तिरस्त्विति वाच्यम् आनेमुगितिसूत्रेभाष्ये
ऽकारस्यागावयवस्यमुगित्यर्थेपचमानइत्यत्रनास्यत्नदातेदितिस्वरोनस्यादित्या
शंक्याद्युपदेशभक्तत्वद्ग्रहणेनग्राहिष्यतेइत्युक्तेरसंगत्यापत्तेः किंचउ.मंतपदावय
वस्यहस्वात्परस्यउ.मोउ.मुडि.त्यर्थंकुर्वन्नास्तेइत्यादौउ.मडागमेणत्वप्राप्तिमाशंक्य
पदागमाइतिन्यायेनायनस्यापिपदांतग्रहणेनग्रहणात् पदांतस्येतिनिषेधइत्यन
यापरिभाषयाआगमानामागमियर्मवैशिष्ट्यमपिबोध्यतइत्याशयकउ.मृटमसूत्रस्यभाष्यासंगतेश्च ॥ ॥

मत्रार्थेपचमानइत्यत्रनास्यत्नदातेडि. दद्युपदेशालसार्वधातुकमनुदात्तम् ङेनः नास्ति अनुदात्तेत् अदुपदेशइत्येतस्मा
त्परलस्यानिकंपत्सार्वधातुकंतदनुदात्तंस्या कुङ्. रङोपरीभूतंततत्रानुदात्तमिति शपिपचइत्युपदेशात्परस्यलस्या

निकस्यमान इति सार्वधातुकंस्यान्नसिद्धं इति प्रकरणात् भवतीति सिद्धं


प. दि. शे
— टी.
३२
32

गामिकृतेऽदुपदेशात्परत्वाभावात् नत्वस्यादित्याशंकितेपदागमपरिभाषयाऽदुपदेशभिन्नात्तद्ग्रहणेनरःसन
इति तदाशंकानिराकरणपरंभ्रानेमुगितितत्रस्थंभाष्यमयुक्तंस्यात् अदुपदेशेऽदस्यमअदुपदेशइतिविशेषण
तयावर्णस्याश्रयणादितिभावः अदुपदेशस्यस्थपनादिरेवप्रकृतेचशपितुअसहायस्याद्यपदेऽपिवस्रावेनादुप
देशत्वमितितत्वम् यदिविशेष्यतयावर्णस्याश्रयणेऽयंपरिभाषाप्रवर्ततेतदाङ. मोङु. मुडि. त्यर्थेकुर्वन्ना
ले इत्यादावुत्तरपदानकारस्यपदांतत्वेपिपूर्वनकारस्यपदांतत्वाभावात् पदांतस्येतिनिषेधाप्रवृत्तावटकु
प्वाङि. तिणत्वंस्यादित्याशंकितेपदागमाइतिन्यायेनपदांतग्रहणेनग्रहणमादायपदांतस्येतिनिषेधेनत
दाशंकानिराकरणपरंङ. मोह्रस्वादचीतिसूत्रस्थंभाष्यमयुक्तंस्यात् रदाभ्यामितिसूत्रादनुवर्त्यमानस्यनर
त्यस्यपदांतस्येत्यस्यविशेष्यत्वेनाश्रयणादितिद्वितिपपत्तेनिराकरणपरग्रंथस्याशयः ः ॥

॥ ॥ ॥ ॥ ॥


॥ ॥ ॥ ॥ ॥




ननु ङमो ह्रस्वादचीति सूत्रस्य भाष्यस्य ङमंतपदावयवस्य ह्रस्वात्परस्य ङमो ह्रस्वादिः त्यस्यार्थकरणे आहत्याद्याश्र ।
यणेन एकदेशयुक्तित्वात् मिद चोंत्यात्परः इति सूत्रस्य भाष्य विरोधेन परिभाषाया अर्थांतरस्य कल्पितमसु—नकुर्व ।
न्नाल ङ्यादेशेण त्वस्य ङ्वोरस्याश्च ननु ङमो ह्रस्वादचीति सूत्रस्य भाष्यसंगमाय तत्र विधीनयावर्णस्याश्रयणेन त्रैयं न प्र
वर्तत इति द्वितीय पक्षस्य निराकरणं संभवति इति मनसा युष्मदावपि तु मिद चोंत्यात्परः इति सूत्रे भाष्ये हि पदि परादि रि
ति प्रकृते अनुस्वारस्य न सिध्यति द्विषंतपः परंतपः मोनुस्वारो हलीत्यनुस्वारो न प्राप्नोतीत्युक्तम् परादि पक्षे मकारस्य त
स्तत्वात् न ग्रहणेन ग्रहणे पि द्वयोः नकारमकारयोः पदांतत्वस्य विरुद्धत्वेन पदांतत्वमिति भाष्याशयः परिभाषायां

किंच गणादेरपरत्वे रेफविशिष्ट गणत्वा—श्रयम् अन्यथा ऋकारस्य गणत्वहीः अरारा
वे वेति नियमो न स्यात् न च वर्णग्रहणे एतदप्रवृत्तेो न संगच्छेत ॥ ॥

मूलोक्त अर्थांतरसत्वे तु एतद्भाष्यविरोधः स्पष्ट एवेत्यरुचेराह किंचेति एतेन पूर्वोक्त परिभाषार्थमनूयाद्विषंतप इति
भाष्यविरोधोद्भावनं केषांचिके पदानुयापि मिः क्षेनतनस्माहित मिति विभावनीयम् वस्तुतस्तु द्विषंतप इत्यत्र नकार
स्य संयोगांतलोपे एकादेशेति विकृत न्यायेन मकारस्य पदांतत्वसत्वे सोला पादनुस्वारः सिध्यत्येवेति मिद चोंत्यादिति सू
त्रस्य द्विषंतप इत्युदाहरणं परं भाष्यमेकदेशयुक्तिरिति नैन भाष्यविरोधात् मूलोक्तार्थासंगतिः अंतरावद्विषंतप इति
प्रतीकमुपादाय परादिपक्षे नकारस्य मकारो भक्तः नकारस्य पदांत इति मकारोपि तद्भक्तत्वात् पदांत इति सिद्धो नुस्वारः




त्पादुः इति केयपदेशोक्तिरपि संगच्छते इत्याहुः किंच वर्णग्रहणे प्रकृतपरिभाषाप्रवृत्तेरुरदाभ्यामिति न्यासस्यभा।
ष्यमप्यनुकूलम् तत्रहि वृद्धिनिमित्तात्प्रतिषेध इत्युक्ते किं प्रयोजनमिति प्रश्ने कार्तिः तैतिः परीत्यवृः इत्यत्र वृद्धौ
कृतायां रदाभ्यामिति नत्वस्याप्तिपादीर्घोदिति नत्वस्य च उदुपधत्वसन्नियोगेनोच्यमानत्वस्याशासेस्प्रतिषे
धः प्रयोजनमुपयायप्रयोच्यमानेपि प्रतिषेधे वृद्धिनिमित्तादिति कथमिदं विज्ञाने वृद्धिरेव निमित्तं वृद्धिनिमि
त्तादिति तत्पतिः संग्रहीतः कार्तिरसंग्रहीतः अथ विज्ञायते वृद्धिर्निमित्तं यस्य सोयं वृद्धिनिमित्तः व्यावृद्धिनिमित्ता।
दिति कार्तिः संग्रहीतः तैतिरसंग्रहीतः उभयथापि कौलिरसंग्रहीत इत्युभयथापि दूषणे उपयादितेयये छे
सिनथास्तित्युक्तो अस्तु तावद्वृद्धिरेव निमित्तं वृद्धिनिमित्तं वृद्धिनिमित्तं वृद्धिनिमित्तादित्यंगीकृतेनेनन्वोक्तं तत्
यतिः संग्रहीतः कार्तिरसंग्रहीत इति पूर्वोक्तदूषणस्तत्वाकार्तिश्च संग्रहीतः कथं वृद्धिर्भवति गुणो भवती
ति रेफशिरा गुणो वृद्धिसंज्ञको ऽभिनिर्वर्तते इत्युक्तम् तत्र रेफशिरा इति प्रतीकमुपादायनन्वोक्तपरिमाण
स्य वृद्धिसंज्ञाविधानात् कथमादिव्यस्य वृद्धिसंज्ञा अथ पूर्वोक्तत्वात् रेफस्य वृद्धिग्रहणेन ग्रहणमित्युच्यते
तदा किमनेनोक्तेन रेफशिरा गुणो वृद्धिसंज्ञक इति पपपि प्रसज्यमानो गुणः रपरो न भवेदपि तु तात्काल
रपरत्वं विधीयते न तथापि न भक्तत्वात् कार्तितः संग्रहीत एव एवं तर्हि स्थितपदप्रदर्शनात्पूर्वोक्तदोषाभा
व इति न त्र्यकैपठः ॥ ॥ ॥ ॥



वर्णग्रहणे एतत्परिभाषाप्रवृत्तौ तु एतदुभयमप्यसंगतं स्यादित्याह अत एवेति वर्णग्रहणे एतत्प्रवृत्तेरेवेत्यर्थः अत
एवेति लोकन्यायसिद्धपरिभाषांगीकारादेवेत्यर्थः अन्यथा अपटीत्कारपितमित्यादावितिदायवधानेन वृद्धिगुणलोपा
योरप्राप्तौ निषेधस्य वैयर्थ्यं स्यादिति भावः एतेन नेटीति ज्ञापकमात्रसिद्धेयं परिभाषेति केषांचित्प्रवादोपास्तः ननु तथा

अत एव रदाभ्यामिति सूत्रे भाष्ये गुणो भवति वृद्धिर्भवतीति रेफाशिरागुणवृद्धिसंज्ञि
कोभिनिर्वर्तत इति अत एव नेटि गोरनिर्दीन्याचरितार्थम् अनागमकानां सागमका
आदेशा इत्यस्यान्वयमर्थः आर्द्धधातुकस्येडागम इत्यर्थे ज्ञाते नित्यं शब्दे आगमविधा
नानुपपत्त्यार्थापत्तिमूलकवाक्यान्तरकल्पनेनेड्विहितवृद्धिप्रसंगे सेड् वृद्धिः कार्यैव्येति ।
एवं चादेशो विवाचापि वृद्धिविपरिणाम इति न नित्यत्वहानिः स्यान्निवत्सूत्रे च नैतदृशा
देशग्रहणसाक्षात्दृष्टाथ्यापीवोधितस्यान्यादेशभावे चारितार्थ्यात् ॥ ॥


यदा विनिसूत्रे प्रनिदारयतिप्रनिधारयतीत्यत्र समानशब्दत्वात् गुसंज्ञाप्रवृत्तिमाशंक्य समानशब्दप्रतिषेध इति वार्तिककृ
ता समानशब्दानां प्रतिषेधो वक्तव्य इति प्रतिषेधवक्तव्यत्वमपादनपूर्वकं निराकृतः भाष्यकृता च समानशब्दाप्रतिषेधो ऽ
र्थवद्ग्रहणादिति अर्थवत्परिभाषामाश्रित्य तद्वार्तिके प्रत्याख्याने इहापि तर्हि न प्राप्नोति प्रणिदाय पति प्रणीयापपत्तिरित्या
शंक्यानर्थकत्वे नोसागमस्तद्गुणीभू ॥



प॰ रि॰ शे॰ टी॰ ३६

तत्स्वकृद्ग्रहणेन गृह्यतेयथा मन्त्रेनवाप्यदोषः किंकारणं अर्थवत आगमस्तद्गुणीभूतस्तद्ग्रहणेन गृह्यत इति समाहि
तम् अनेन तर्ह्युक्तं पुनः पन्नित्येषु नाम शब्देष्वागमशासनं स्यात् अनित्येषु नाम शब्देषु कूटस्थैरविचालिभिर्वर्णैर्भवि
तव्यमनपायोपजनविकारिभिः आगमस्तु नामापूर्वः शब्दोपजन इति नित्येष्वागमविरोधात् तद्वारेणादेशविधानाद्वा
पशब्दप्रत्याख्यवान्नदा शब्दइत्याशयेन पुनर्दोषमुत्पादयस्याशंकायां तत्रापि स्यानिनिमपनीय आदेशः क्रियते इत्यनि ।
त्यत्वप्रसंगसामान इत्याशयेन अयमुक्तं पन्नित्येषु शब्देष्वादेशाः स्युरित्यादेशपक्षेपि समानदोषत्वमभ्दाव्यस्थानश
ब्दस्य प्रसंगवाचित्वाभ्युपगमेनवादं युक्तं पन्नित्येषु शब्दांतरैरिह भवितव्यं तत्र शब्दांतरे शब्दांतरस्य प्रतिपत्तिर्युक्तेति
समानदोषोभ्दावनेनिराकृते आदेशास्तु ह्यमे भविष्यंति अनामकानां सागमकाः तत्कथं सर्वे सर्वपदादेशा दाक्षीपु
त्रस्य पाणिनेः एकदेशविकारे हि नित्यत्वं नोपपद्यत इति आगमानामप्यदेशत्वं स्वीकृतं भगवता तथा सतिपत ।
भ्दाष्यानुरोधेन आगमानामप्यादेशत्वं स्वीकृतं भगवता तथा सति पतञ्जलिभाष्यानुरोधेन आगमानामादेशत्वे स्था ।
निवत्सूत्रेणैव सर्वेष्टसिद्धौ ने टीत्यादिज्ञापकेन लोकन्यायेन वा पदागमपरिभाषाश्रयणं निरर्थकमित्यत आ
ह अनागमकानामिति तथा चात्रस्थानिवत्सूत्रे भाष्ये अनुपपन्नं स्थान्यादेशत्वं नित्यत्वादिति स्थान्यादेशत्वे श
ब्दानामनित्यत्वाशंकायां तत्र प्रकारांतरेण जाड्याशंका समाधाय कार्यविपरिणामाद्वा सिद्धमिति पक्षांतरे ।
ण समाहितम् कार्यविपरिणामादित्यस्यायमर्थः कार्या बुद्धिः संप्रत्ययः तस्य विपरिणामः कार्यविपरिणामः त
स्मादिति तत्र यथा कश्चित्कस्मैचिदुपदिशति प्राचीनं ग्रामादाम्रा इति तस्य सर्वत्राम्रबुद्धिप्रसक्ता जनतः पश्चादा
हयोक्षीरिणोवरोह वंतः पृथुपर्णाः ॥ ॥ ॥ ॥


३४



नेन्यग्रोधाइतिसतत्राम्रवृक्षान्न्यग्रोधवृक्षं प्रतिपद्यते सततः पश्यतिवृक्षाम्राग्रांस्त्रापक्षप्रमाणान्न्यग्रोधांस्त्रोपा
धीमानानित्याएवंचखामिनिविषयेआम्राःनित्याश्चन्यग्रोधाःवृद्धिस्तस्यविपरिणायते इतिदृष्टांतेनएवमिहापिच
लिरस्यायविशेषेणपरिदृष्टस्तस्यसर्वत्रालिवृद्धिप्रसक्ताशास्त्रेभूरित्यनेनअलिवृथ्याभवतिवृद्धिंप्रतिपद्यते सत
नः पश्यतिअलिंचापक्षप्रमाणंभवतिंचापाधीयमानंनित्यपपत्तिः परिहृतापवंचखास्मिन्विषयेऽलिर्नित्योभ
वतिश्चावृद्धिस्तस्यविपरिणाम्यतइतिआदेशानांवृद्धिविपरिणाममात्रत्वमभ्युपेत्यत्वानुपपत्तिः परिहृवायपातथा
आगमेष्वपिनित्यत्वानुपपत्त्याशंकापरिहाशर्थत्वेनानागमकानांसागमकाइतिवृद्धिंपविपरिणाममात्राशास्त्रा।
स्यपादाद्यादेशत्वमंगीकृतमभगवतानैताचतानेषामादेशत्वंसत्यपितस्मिस्थानिवत्सूत्रेनद्ग्रहणेनतेषांग्रहणंचेति
भावः तदुक्तं चैकदेशविकारेहीति प्रतीकमुपादायतत्रैवकैयटेनयद्यपिसर्वविकारेष्वनित्यत्वंयथापाटरस्यपयसः
पाकादिषु तथापिविकाराभावस्तीति पादनपरमेतत् वृद्धिविपरिणाममात्रम् स्थान्यादेशआगमागमिभावव्यवहारे
णक्रियतेइत्यर्थः यद्येवंदाशाहस्यदापशाहआदेशःक्रियतेइतिदाशाहस्यानर्थक्यप्रसंगः नैषदोषः नित्यतासमर्थ
नायादेशपक्षआश्रितः प्रक्रियायांतकल्पितायामागमिभावएवअन्यथाआगमादेशयोर्भेदेनव्यवहारोनस्यादि

॥ ॥ तिदिति ॥ ॥

॥ ॥ ॥ ॥


प॰ रि॰ शे॰
टी॰
३५
35

नन्वेवमपिस्थानिवत्सूत्रस्यसाक्षाद्दृष्टाध्यायीप्रदिनस्यान्यादेशभावेचरितार्थत्वेपियथानास्मिन्नेवसूत्रेआदेशग्र
हणेनानुमानिकादेशग्रहणंभवतितथानित्यत्वानुपपत्तिपरिहारार्थंवृद्धिविपरिणामत्वमात्रांशसाम्यमादाय
आगमानांआदेशत्वांगीकारेपिनास्मिन्सूत्रेआदेशग्रहणेनतेषांग्रहणेतत्वाविशेषान्नकिंचिद्बाधकमकेपठो
क्तआमामदेशयोर्भिन्नव्यवहारानुपपत्तिस्तट्टित्किदादिनापिपरिहरणीयेत्यरुचेराह किंचैवमितितथाचा


किंचैवंसतिस्थानिवद्भ्यवेवकार्यप्रवृत्त्यानिर्दिश्यमानपरिभाषाया अप्रवृत्त्याआग
मसहितस्यपिवाद्यादेशापत्त्यालावस्थायामडिनिभाष्योक्तसिद्धांतासंगतिः ॥

नुमानिकादेशवदस्यापिस्थानिवत्सूत्रेआदेशग्रहणेनग्रहणेपाठस्यादेर्धातोल्डिलावस्थायामेवतत्राडागमेः अ
हितस्यपाठस्यादेःअडागमसहीनयाठस्याद्यादेशेस्थानिवद्भावेनपात्वादिवुध्यानिर्दिश्यमानस्येतिपरिभाषायाअ ॥ ३५
॥ ॥ ॥ ॥ ॥



प्राप्त्याअडागमसहितस्यपिबाधादेशेऽपिबदित्याद्यसिध्यालावस्थायामडितिअसिद्धवदत्राभादितिसूत्रस्यभाष्योग
क्तसिद्धांतोव्याकुप्येतपतस्यादेशग्रहणेनाग्रहणेतुलावस्थायांकृतेप्यडागमेयदागमपरिभाषया अदस्तदवयव
त्वेपिनिर्दिश्यमानस्येतिपरिभाषयाऽत्यादेरेवपिबाद्यादेशोपिबदित्यादिसिध्यानभाष्योक्तसिद्धांतव्याकोपइतिभावः
तत्रः हिअसिद्धवदत्राभादित्यस्यप्रयोजनपरिगणनावसरे अडाज्विधौप्रयोजनंअकारिरोहीतितलोपेकृतेलङि त्य।
ङ्केनंप्राप्नुतः असिद्धत्वान्भवतः असिलोपइणोश्चयणादेशः प्रयोजनम आस्तन्नापनइणास्त्रोपिएणलोपयोःकृतयोरंन
जादित्वादाप्नप्राप्नोतिअसिद्धत्वान्भवतीतिप्रयोजनमपयायअसिलोपरूपप्रयोजनंश्नसोरल्लोपइतितपरकरणेनइ
णःयणादेशप्रयोजनंचपरः इणोततः परेवेकाचल्लनोऽसंयोगपूर्वस्येतियोगविभागेननिराकृतप्सर्वयामवपरिहारः।
उपदेशइतिवर्तनेनतत्रोपदेशावस्थायामेवाडादोभवतः अथवाआर्द्धधातुकइतिवर्तते अथवालङ्ः लङ. लङ. ल
ङ.ल्वडितिद्विलकारकोनिर्देशः लङादिषुलकारादिष्वेतोमिउपदेशइत्यनुवृत्त्याआर्द्धधातुकेइत्यनुवृत्त्याद्विलकार
निर्देशेनचेत्येतन्मतत्रःयेरणप्रयोजनंनिराकुर्वताभाष्यकृतालावस्थायामडितिसिद्धांतोभ्युपगतः ४ ॥ १० ॥

॥ ॥ ॥




प॰रि॰टी॰

ननु स्थानिवत्सूत्रेण समुदायस्य तत्त्वबुद्धावपि न तस्य सह पसन्निर्दिश्यमानत्वम् तथा सति निर्दिश्यमानस्येति
परिभाषया पादिमात्रस्यैव पिबायादेशापत्त्या लोपस्यायाम ङिति भाष्योक्तसिद्धांतासंगतिरित्यत आह स्थानि।
वद्भावेति तथा च स्थानिवद्भावेन तत्त्वबुद्धावपि स्वरूपसन्निर्दिश्यमानत्वाभावमादाय निर्दिश्यमानपरिभाषायाः

36

स्थानिवद्भावविषये निर्दिश्यमानस्येति परिभाषाप्रवृत्तौ नोतिस्तणामित्यत्र परत्वान्नित्यत्वात्तिस्त्री
देशे स्थानिवद्भावेनत्र पादेशमाशंक्य सन्नङ्गतिन्यायेन समाधानपरभाष्यासंगति।


प्रवृत्तौ तु निस्तणामित्यत्र त्रयादेशाशंकैव नोदेति अज्ञानवत्तदासंकायामपि निर्दिश्यमानस्येति परिभाषयैव।
समाधाने सिद्धे सन्नङ्गतिन्यायेन समाधानांतरं भाष्योक्तमयुक्तं स्यादिति भावः ॥ ७ ॥



नन्वाद्यादष्टाध्यायीपठितस्यान्यादेशाभावेस्थानिवत्सूत्रस्यचारितार्थ्येनआदेशग्रहणेनानुमानिकादेशस्यता।
ऽग्रहणेभवत्वित्यादौअल्विधिनास्थानिवद्भावाभावेननुइमस्यनित्यभावात्तिङः तत्वाभावेनपदत्वानापत्त्याअप
दंनप्रयुंजीतेतितन्नप्रयोगासाधुत्वस्यादित्यतआहप्रहरित्यादावितितथाचराहरित्यादावर्थवत्त्वेवस्यान्यादेशभाव
विषयत्वेः शब्दःस्वरूपविशेषमादायअनित्यत्वानुपपत्तिमूलकतदंतपरत्वेनपठितेनश्कारांतस्यतिशब्दस्वरूप।


प्रहरित्यादौस्थानषष्ठीनिर्देशात्तदंतपरतयापतितत्वाकांक्षेवसमुदायादेशपर।
त्वेनादेशग्रहणसामर्थ्यात्तस्यस्थानिवत्सूत्रेग्रहणेनदोषः ॥ ॥

स्यउकारांतनुशब्दरूपआदेशस्यादिवाक्येनबोधितानुमानिकसमुदायादेशस्यस्थानिवत्सूत्रेआदेशग्रहणसा
मर्थ्यादादेशग्रहणेनग्राहणेपिनकिंचिद्बाधकमितिभावः ॥ ॥ ॥
॥ ॥ ॥ ॥ ॥



ननुएवमपिअचःपरस्मिन्निति सूत्रविषयेसर्वत्रआनुमानिकस्थादेशस्यातत्त्वेनानतिप्रसक्तत्वात्स्थानिवत्सू
त्रेणैवनिर्वाहेअस्तिपूर्वाचःपरस्मिन्नित्यादेरसंगतिरित्यतआह आनुमानिकेति तथाचदाधाघ्विति सूत्रेभाष्य
कृताआगममानाआदेशत्वाभ्युपगमेपिपूर्वोक्तयुक्त्यास्थानिवत्सूत्रेआदेशग्रहेनग्रहणंनेतिसिद्धमतत्फलमाह

आनुमानिकस्यान्यादेशभावकल्पनेऽपिश्रौतस्यान्यादेशभावस्यतत्त्यागइत्यचः पर
स्मिन्नित्यादेर्नासंगतिः एतेनपदागमाइतिपरिभाषास्थानिवत्सूत्रेणगतार्थे
त्यपास्तम् एतत्सर्वंदाधाघ्वितिसूत्रेभाष्येस्पष्टम् ॥


एतेनेति एतत्सर्वमिति भाष्यंतुआनागमकानामितिग्रंथावतरणे पूर्वमेवदर्शितंर ॥ ॥


यदागमपरिभाषयायवादसंगतिं सूचयन निर्दिश्यमानस्येति परिभाषामवतारयति नन्वेवमित्यादिना ननु
पूर्वयदागमपरिभाषयायमुदिश्येत्यर्थस्यव्याख्यानत्वेनग्रउडागमविधायके ग्रगस्योद्देश्यत्वेनतयाग्रगत्वस्याति
देशेपिस्थानत्वस्याननिर्देशादुदःस्थादित्यत्रपूर्वसवर्णत्वापादानमयुक्तमितिचेन्न उद्देश्यतावच्छेदकीभूतधर्मसमा

नन्वेवमुदस्थादिमादावुदःस्थास्तंभोरितिपूर्वसवर्णोपत्तिरतआह निर्दिश्यमा
नस्यादेशाभवंति षष्ठीस्थानेयोगेतिसूत्रस्थनवर्तते ॥

नाधिकरणयावद्धर्माणांकार्यप्रयोजकानांकार्यार्थतयाग्रनयातिदेशेनस्थानत्वस्याप्यतिदेशेनदामतेदर्वशित्वात्
ग्रन्यथाप्यधिष्टीष्टेत्यादौनकारस्यकारोद्देशेनस्तुतनिष्ठोरितिविधीयमानेसुप्तितत्वादेरतिदेशेपिग्राईधातुकस्थान
निर्देशादिडागमानापतिः स्तनसांप्रसज्येत सर्वोत्तमपरिभाषावत्रैवंज्ञापकलोकन्यायसिद्धाकिंतसूत्रार्थभूतेत्याह ष
ष्ठीति ॥ ॥




आवर्तनइति नन्विदं षष्ठीस्थानेयोगेतिसूत्रस्यभाष्यविरुद्धम् तत्रहिसर्वमिदंनियमार्थमिति प्रसाधितेयदिनियमःक्रिय
तेयत्रेकाषष्ठीअनेकंचविशेषंतत्रनसिध्यति अंगस्यहलःयणःसंप्रसारणस्येतिहलपिविशेष्यःयणपिविशेष्यःसंप्रसा
रणमपिविशेष्यमस्तिपुनर्नियमेकामचारःएकयाषष्ठ्याअनेकंविशेषयितुम् तद्यथा देवदत्तस्यपुत्रःपाणीःकंबलइ
ति तस्मान्नार्थोनियमेनेतिनियमार्थत्वंनिराकृत्यननुचोक्तंएकशतंषष्ठ्यर्थाः यावंतोवातेसर्वेषष्ठ्यामुच्चारितायांप्राप्नुवंती त्याशं
कितेनेषदोषः यद्यपिलोकेबहवोऽभिसंबंधाः अर्थायोनामौखास्रौपाश्चशास्त्रस्यचशब्देनकान्योऽभिसंबंधोभवितुमर्हति
अन्यदतःस्थानादितितदाशंकांनिराकृत्ययाशास्त्रस्यापिशब्देननानांतरादयोऽभिसंबंधाः अस्तेर्भूर्भवतिसंदेशःस्थानेअनंत
रेसमीपेइत्येतियुक्तानराशब्देननानंतरादयोऽभिसंबंधाः अस्तेर्भूर्भवति संदेहःस्थानेअनंतरेसमीपेइतितिपुनराशंकिते
संदेहमात्रमेतन्भवतिसर्वसंदेहेषु चेदमुपतिष्ठतेव्याख्यानतोविशेष प्रतिपत्तिर्नहिसंदेहादलक्षणमितिस्थानेत
ति व्याख्यास्याम इतितदाशंकांनिराकृत्यननतहीदानीमयंयोगोवक्तव्यःउक्तावक्तव्यश्च किंप्रयोजनंषष्ठ्यंतं॰ स्थानेन
युज्यतेयतःषष्ठ्युच्चारितायां किं कृतंभवतिनिर्दिश्यमानस्येति परिभाषानकर्तव्याभवतीत्युक्तम नेतस्याभाव्यात्तद
त्रा तत्वअयमर्थोलभ्यते इतिप्रतिपत्ते अपितुप्रसिद्धार्थकंविनेवांतरंगत्वादिनाअस्मिन् शास्त्रेननतस्थलेसर्वस्या
न संबंधूलाभात् एतस्यानर्थं मान्निर्दिश्यमानस्येत्येनदर्थकमेवेदंसूत्रमिति चेत्तर्हिमहद्गुडिवोधनाय सूत्रे।
एतावलंबनेनेआवर्तनइत्युक्तेरदोषात् ॥ ॥



प्रथमार्थस्य प्रसिद्धत्वाद्वावर्त्यमानस्य द्वितीयस्यार्थमाह तत्रेति षष्ठीस्थानेयोगेति सूत्रे प्रत्ययग्रहणपरिभाषयाष
ष्ठीशब्देन षष्ठ्यन्तग्रहणे स्यादित्याशयेनाह षष्ठ्यन्तमिति निर्दिश्यमानपदार्थाद्वारेणाह निर्दिश्यमानमिति ननु निश्शङ्को
नैरन्तर्यपरः दिशि रुच्चारणक्रियाः तथा सति नैरन्तर्येणोच्चार्यमाणमिति तस्यार्थो लभ्यते सूत्रे उच्चार्यमाणस्य न तस्य व
धः ननु तस्य सूत्रे उच्चार्यमाणत्वमित्यत आह उच्चार्यमाणसजातीयमेवेति सूत्रोच्चार्यमाणसजातीयत्वस्य लक्ष्यमित्यर्थः न
न्वेवमपि सुपद उदः स्थादिसादिसिद्धावपि अनिस्यस्यादौ तदोः सस्सादित्यादौ त्यदादीनामित्यस्य संबंधे अग्रस्येत्यस्य च

तत्र द्वितीयस्यायमर्थः षष्ठ्यन्तं निर्दिश्यमानमुच्चार्यमाणसजातीयमेव निर्दिश्यमाना
वयवरूपमेव वा स्थानेन स्थाननिरूपितसंबंधे प्रयुज्यते तेन तु प्रतीयमानमित्यर्थः तेनेदं सि
द्धम्


तदंतविधौ त्यदाद्यंतानामंगानां तकारस्कारयोः सः स्यादित्यर्थेन अतितकान्सस्तत्वादेशापत्तिः त्यदादीनामित्यस्य नि
र्दिश्यमानत्वेऽपि तदवयवस्य कार्यविधानाद्विनिर्दिश्यमानपरिभाषया वारणासंभवादित्यत आह निर्दिश्यमानावयवे तिउच्चा
र्यमाणसजातीयावयवरूपमेव वेत्यर्थः स्थान इत्यस्यार्थमाह स्थानेनेति योगा इत्यस्यार्थमाह प्रयुज्यत इति अत्र च कर्मणि यत्र
त्ययः तदर्थे व्यावर्त्यमाह नेति तेनेदं सिद्धमिति पूर्वोक्तसूत्रार्थेन निर्दिश्यमानस्येति वचनं सिद्धमित्यर्थः ॥ ॥



ननु अस्य च्वावित्यादौ शुक्लीभवतीत्यादावीत्वेपि मालीभवतीत्यादावीत्वं न स्यार्दिश्यमानत्वाभावात् इति व्यक्तिपक्षमादायाशंकते न
चेति व्यक्तिपक्षे तथा सत्वेपि जातिपक्षे अन्त्यादिजात्याश्रयाकारान्तानां सर्वेषां निर्दिश्यमानत्वान्न दोष इति जातिपक्षमादायोत्तरयति जातिप
क्षे इति सत्रकारस्येममत्व्यक्तिपक्षाभिप्रायेणोत्तरमाह किंचेति नच व्यक्तिपक्षेपि सर्वत्र निर्दिश्यमानपरिभाषायाः प्रवृत्तौ अलोन्त्यप
रिभाषाया निरवकाशत्वान्न पाअस्या बाधेनास्य च्वावित्यादौ ग्रहणकशास्त्रेण सर्वेषां स्थानित्वलाभेनेष्टसिद्धौ दोषाभावात् भ्रस्वधियो
रिति ज्ञापकाश्रयणं तत्पक्षेन युक्तमिति वाच्यम् आदेः परस्येति परिभाषाबाध्यालोन्त्यस्येति परिभाषया निर्दिश्यमानपरिभाषायाः
बाधे अभ्युपगम्यमाने आदेः परस्येत्यनेनापवदसं निर्दिश्यमानपरिभाषायाः बाधस्याभ्युपेयत्वेनोदः स्यादित्यादौ दोषस्य दुरुद्धरत्वात्

**नचास्य च्वावित्यादौ दीर्घाणामादेशानापरिभाषायानिस्त्वेषां निर्दिश्यमानत्वाभावा
दिति वाच्यं जातिपक्षे दोषाभावात्**

नच उदः स्थादित्यादौ पदागमा इति परिभाषया प्राप्तं पद्धिशिष्टस्य स्थानित्वं तस्य निर्दिश्यमानपरिभाषया बाधेन स्था इत्यस्यैव स्थानित्व।
सिध्या तस्य चादेरिति परिभाषया बाधेपि न दोष इति वाच्यम् निर्मयाणि कयदागमेति परिभाषायबाधक निर्दिश्यमानपरिभाषाबा
धपर्यंतानुधावनापेक्षया इत्वं प्राप्त यदागमेति परिभाषाप्राप्तस्थानित्वस्यैव आदेरित्यनेन बाधकस्य नस्य युक्तत्वात् आदेः परस्येति परि
भाषाबाध्यालोन्त्यपरिभाषया निर्दिश्यमानपरिभाषाबाध्यत्ववान्निर्दिश्यमानपरिभाषाबाध्ययदागमेति परिभाषा आदेः परस्येत्यने।
न बाध्यत्वस्यापि वक्तुं शक्यत्वात् एतेन निर्दिश्यमानपरिभाषाया निरवकाशत्वेन बाधकत्वमभ्युपेत्य अन्यथा तु नभ्रस्वधियोरिति निषे
धस्य ग्रहणकशास्त्र ग्रहीतानां निर्दिश्यमानकार्यबोधने ज्ञापकत्वमुक्तं तद्भाषादित्यपास्तम् ॥ ॥ ॥ ॥


ननु अविप्रथानि नित्यत्वेऽपि इ॰ वृ॰ ङ॰ ई॰ त्वं अंत्यादेशार्थमिति वाच्यम् तत्राप्युक्तिं निर्दिश्यमानपरिभाषया घोरिति इ
कारोकारयोर्निर्दिश्यमानत्वेन इवर्णोवर्णान्तधातुस्थले अन्त्ये वर्णोवर्णयोरेव सिद्धत्वात् तस्मान्निर्दिश्यमानपरिभाषानित्य
त्वज्ञापनार्थत्वेन ङि॰ त्वस्याभ्युपेयत्वेन व्यक्तिपक्षेपि अस्यच्छ्वाविसादावदोषात् भूस्सुधियोरिति ज्ञापकाश्रयणेन युक्तमित्यत
आह इ॰ वृ॰ ङ॰ ई॰ त्वं न्वितिति इवर्णोवर्णान्तधातुभ्रुवामित्यत्र सर्वं मूलत्वेन अभ्यर्हितत्वाद्धात्वन्तस्य पूर्वनिपातः इवर्णो
वर्णान्त अथातुभ्रुवामिति पाठः अतएव धात्वादीनामित्युक्तः संगच्छते सूत्रेतु सौत्रत्वात् द्वित्वतया अल्पाच्तरत्वे
न तथा प्रयोगश्चेति वाच्यम् नन्वेवमपि री॰ ङ॰ रि॰ ङ॰ ई॰ त्वं व्यर्थं तत्राप्यनेनैव निर्वाहादित्यत आह री॰ ङ॰ रि॰ ङ॰ ई॰ त्वं न्विति।

किंच न भूसुधियोरिति निषेधेन ग्रहणकशास्त्रस्य हीनानां निर्दिश्यमानकार्यबोधनान्न दोषः इ॰ य॰ ङ॰ वृ॰ ङ॰ ई॰
त्वं तु इवर्णोवर्णान्तधातुभ्रुवामित्यर्थेन धात्वादीनामपि निर्दिष्टत्वादंत्यादेशत्वापरी॰ ङ॰ रि॰ ङ॰ ई॰ त्वं तु स्पष्टा
र्थमेव एतेन दं॰ ङि॰ त्वं वर्णग्रहणेन निर्दिश्यमानपरिभाषायाः प्रवृत्तिज्ञापकमित्यपास्तं हपवरट्सूत्रस्थ
नायोगवाहानामुपदेशे अलोन्त्यविधिः प्रयोजनं निर्दिश्यमानस्यैवेति सिद्धमिति भाष्येण सह विरोधात्

न च यथाश्रुतेर्थे निर्दिश्यमानपरिभाषाया अपाय या अनिसश्च्यादौ तत्स्यसापि निर्दिश्यमानत्वेन आससत्वे वारणाय अर्था
न्तरस्वीकारस्य अन्तनत्वदादीनामित्यस्यापि निर्दिश्यमानत्वस्वीकारः तथा री॰ ङ॰ आदि विधावपि अन्त्याभ्रं नागस्येत्यस्यापि।
निर्दिश्यमानत्वं ङ॰ निवार्यं तथा सति आसरी॰ ङ॰ आदिसमुदायस्यानित्यत्वाद्यर्थं हित्वं चरितार्थमिति वाच्यम् सत्व वि
धौ स्यदादेस्त्यन्तस्यान्तदन्तविधौ विशिष्टस्यस्यान्त्यवपूर्वत्वेपि केवलत्यदादेरपि स्यान्त्यवपविन्तसात्ततत्वान्निर्दिश्यमान
परिभाषाया विशिष्टस्यसत्वाप्रवृत्तावपि री॰ ङ॰ आदिविधौ अन्त्याभ्रं नागादित्यस्य केवलस्य अविप्रसंगेन स्यानित्यासंभवात् दं


नविधिना इव शपं न दं तां गसेवस्यानित्यस्य वाच्यतया तत्र निर्दि
श्यमानपरिभाषा



अन्त्यानिर्दिश्यमानस्यैवादेशासिद्धोऽङित्त्वस्यैवैयर्थ्यात् तथाचनिर्दिश्यमानस्यस्यसाक्षादनुच्चार्यत्वानिर्दिश्यमानस्यर्थ्योचो
ध्यः पादः पदिनिस्त्रस्यपरिभाषाविषयकत्वानित्यस्युदाहरणपस्भाष्यादयमर्थोऽवधेयः सोऽक्त्वाप्रलांतरत्ववक्ते हन्दर्शप
ति हयवरट्सूत्रस्येनेति पूर्वपृष्टस्पटीका नन्वेतत्परिभावत्वत्परिभावंतरणोपदागमत्वायमांत्रालब्धविशिष्टस्यस्थानीत्वंहिल
भ्यते तथाचेत्सुपदरन्याय्यसिद्धि प्रसंगः तस्मात्येनविधिरितिशात्वतदंशस्यस्थानित्वबाधकत्वालाभात् नचसामान्यतः सर्वबाधक
त्वमेवकुतोनेतिवाच्यम् तथासतिनचासच्चाविप्रायुत्तरग्रंथविरोधात् अन्यथाजातिपक्षप्रासद्दीर्घादीनांस्थानित्वस्यबाधा

अनयापरिभाषायायेनविधिरितिसूत्रबोधिततदंतस्यस्थानित्वाभावबोधनंपदा
गमाऽनिलब्धस्यचतेनसुपदऽदस्यादित्यादिसिद्धिः अनयाचलत्वनिमित्तत्त्विधा
पितानामलोन्त्यस्येत्यादीनाम् ॥ ॥


त् जातिपक्षे दोषाभावादितिसमाधानासंगत्यापत्तेरित्यतः पर्यवसितार्थमाह अनयेती तथाचोपास्थितत्वात्तयोक्तावपि
तत्त्वसाध्युपलक्षणमितिभावः अनेनैवक्रमेणतयोरुदाहरणे आहतेनेति अलोंत्यस्येत्यादीनांनिर्दिश्यमानपरिभाषा
याबाधकत्वंकेषांचिरभिमतंखंडयित्वंस्वसिद्धांतमाह अनयाचेति ॥ ॥ ॥



समावेश इति तथाहि मादादीनामइत्याद्यो ग्रंगाधिकेरपाटेनन दंववियो निर्दिश्यमानस्यादायंतस्याकार इति
सूत्रार्थेनवाधकाभावाननिर्दिश्यमानस्यालोंत्यस्येत्यनयोः समावेशः संभवतिएवं ह्रस्वत्वनिमित्तकहस्वत्रियोगेनवि
धीयमानराःत्तकचेतिकादेशेपिनिर्दिश्यमानांत्यस्यकादेशइत्यर्थेननयोः समावेशोवाध्यः तथैवद्वंतरूपसर्गेभ्याप

समावेशएवनवाध्यवाधकभावः विरोधाभावात् ॥ ॥


इति हसादिभ्यः परस्यनिर्दिश्यमानस्यापृक्तादेरीदादेशइत्यर्थेननिर्दिश्यमानस्यपृक्तादेः परस्येत्यनयोरपिसमावेश
एवनवाध्यवाधकभावः एवमेवपादःपदित्यस्यनिर्दिश्यमानस्यसर्वस्यपादकस्यपदनेकाल्लादेशइत्यर्थेननिर्दिश्य
मानस्यानेकाल्शित्यनयोरपिसमावेशएवनवाध्यवाधकभावइति तत्रेहेत माहविरोधाभावादिति ॥ क



ननुअलोंत्यपरिभाषायांयस्यास्थानित्वं आदेःपरस्येत्यनयाचयदागमाश्चितिमापलब्धस्यआगमविशिष्टस्यआदेःस्थानित्वंअनेका
लित्यनयाचनदंतविधिलब्धाविशिष्टस्यस्थानित्वंनिर्दिश्यमानेत्यनयात्तुविपरितमितिविरोधात्तविरोधाभावइतिचेन्न तच्छेष।
पदेत्यस्जेर्ह्रुड्डिरित्यादौपकवाक्यतयापरिभाषाद्वयेणान्वयविरोधवदत्रत भावइत्याशयात् ननुविरोधाभावाद्वाध्यवाधकभा
वेष्यंगांगोभावःकृतोनेत्यतआह नापीति गुणानांपरार्थत्वादसम्बंधःस्यात्समत्वादितिन्यायात् ननुएवमपियेनविधिर्यदा
गमइत्युभयवोधितस्थानिनः अनेकालइत्यत्रसर्वपदेनग्रहणान्निर्दिश्यमानपरिभाषयासहविरोधसंभवेनतस्याउदस्या

नाप्यंगांगीभावःउभयोरपिपरार्थत्वेनतद्योगात् अनेकालशिदितिसूत्रेसर्वग्रह्णे
नत्परिभाषावोधितएवगृह्यते पत्वादेःपरस्यालोन्त्यस्येत्यनेनावेनद्वाधकाविनित
त्र ॥


दित्यादेशेअदःस्यात्तंभोरित्यस्यप्रवृत्तिनिव्यावर्त्तकत्वेन चरितार्थत्वादत्रपरदनेकालित्यस्यप्रवृत्त्यात्तुपदोनिर्जरसाविन्यायसिद्धिःस्या
दित्यातआह अनेकालिति नन्वेवमपिजरायाजरसन्यतरस्यामित्यस्यांगाधिकारस्यनतदंतविधौजराशङ्कांते अनेकालितिवाधेन
निर्दिश्यमानस्येत्यस्याप्रारितार्थीनअलोंत्यस्यादेःपरस्येतिपरिभाषाद्वयमनवकाशत्वादस्यावाधकंस्यात इतिकस्यचिद्वाशंका
मनुवदति अवाधकत्वेनैवोपयत्तौवाधकत्वकल्पनायाअनुचितत्वात् इत्याशयेनपरि तत्रेति ॥ ॥



तन्नैव प्रमाणमाह उदस्थादिति भाष्य इति तत्र हि एतत्परिभाषाप्रयोजनपरिगणनावसरे उदः स्थास्तम्भोः पूर्वस्येति प्रयोज
नं उदस्थाद् उदस्थानां ग्राहिद्विष्णेन सह कस्य पूर्वसवर्णः प्राप्नोति उदः स्थास्तम्भोरिति निर्दिश्यमानस्यादेशा भवन्ति दोषो न भ
वतीत्युक्तं ननु तयोरेतस्यावाधकत्वं मास्तु इयं तयोर्बाधिका उक्तोनेत्यत आह नाप्येतयोरिति तत्र हेतुमाह एतयोरि
ति स्थाने विषयेतिविशति सूत्रस्य कैयटसंमतिमाह निर्दिशतीति तत्र हि निग्रहणं किमर्थं न विशतेर्दिति लोपः इत्येवो
च्येत तेनैव शंका विशति दिति लोपः इतीष्यमाने त्यस्य प्रसज्येत सिद्धं त्यस्य यस्येति लोपेनैव तत्रारंभसामर्थ्यात् शतृस्य
भविष्यतीति शतृस्यैवेयपर्यप्रतिज्ञाय ·· पाक्रिय प्रमाणमपि निग्रहणं त्यस्य कस्मान्न भवतीत्याशंक्य निर्दिश्यमानस्यादेशा भवन्ती
ति समाहितं भाष्ये तत्र निर्दिश्यमानस्यादेशा भवन्तीति प्रतीकमुपादाय तात्पर्येण परिभाषाव्यापारः कथ्यते तेन हि निर्दिश्य

उदस्थादिति सूत्रविषये स्थाः यादःपदिति सूत्रे भाष्ये संचारितत्वात् नाप्येतयोरियं वाधिका एत
योर्निर्विषयत्वप्रसंगादिति निर्दिशतीति सूत्रे कैयटः प्रकृत्विषये नायं न्यायः स्यादिति वस्तुतस्तेने
व तत्सम्पपतितत्वात् येन नानुपत्येव कार्यं जनात् ॥

मात्रपरिभाषा ह्यतोन्यस्यादेः परस्येतयोर्बाधिका एतयोर्निर्विशयत्वप्रसंगात् तस्याविग्रहणसामर्थ्यादलोन्त्यस्यावपस्या
नेसर्वस्य नेलोपो भवतीत्ययमस्य भाष्यस्यार्थ इति कैयटः एतेन निर्दिशतीति सूत्रस्य भाष्यानुरोधेन तयोरियं वाधिका
भविष्यतीत्याशंका कस्यचिदाविर्भाविय पहता ननु किमः कः इति सूत्रेण विधीयमानः कादेशः निर्दिश्यमानपरिभा
षया प्रोक्तविशिष्टस्य न स्यादित्यत आह प्रकृत्विषयेनायं न्यायः इति यत्र प्रमाणं च तत्र इत्येव वक्तव्ये कादेशविधानमे
व कादेशविधाने स्यकच्विशिष्टस्यादेशार्थं प्रकृत्विषयेति निर्दिश्यमानपरिभाषाप्रवृत्तौ तत्र हूरर्थं स्यात् नचमहर्मुक्ततदा
दिनामित्यस्यानुवृत्ता वपि तौ न्यस्यस्मादिति वाच्यम् किं शहृस्यदेः प्राक् पद्विषयमाणतेन त्यदादीनामित्येव सिद्धे एतद्धिया



यत्तु कैयटेनानुपपत्तिरित्यादिना पूर्वोक्तमेवार्थमनूद्य उक्तिवृद्धेन: आहन्त्यासाकस्मादेश इति सूत्रपर्यन्तग्रहणे
तस्यैवोपस्थाः अत्रत्याभ्यासे इमाविन्यादावतिव्याप्तेश्चान्यत्रैकेऽस्मिन्नयं दुष्टक्रमं आहन्त्याविधाने प्रमाणाभावात् आहृति
स्यमर्ष्यादेवनिर्दिश्यमानपरिभाषायाबाधनेदशाहृतो ज्ञापकत्वासंभवाञ्च इमाविस्यादौ किमः क इति सूत्रे त्रवि
भक्तावित्यनुवृत्तौ तस्मिन्निति परिभाषाप्रवृत्त्या त्यदादीनामः इती जायमानस्याकारस्य व्यवधायकत्वेन प्रत्ययविहित
विभक्तिपरत्वादिमत्र इत्यस्याः प्रवृत्तौ प्रतिव्याप्तेस्तु संभवएव पूर्वं प्रहसटीका तस्येवं षष्ठीस्थाने इत्यर्थकत्वे
निर्दिश्यमानमपरिभाषायाः पूर्वं प्रतिपादितं तस्याश्च स्थानिद्वारा संबंधविशेषणवत्प्रवृत्तिस्तदर्थकत्वेन तस्याश्र
पिते त्रप्रवृत्त्यापत्त्यानिर्दिश्यमानावयवगतित्वद्वितीयाथ्यसाधुक्तमादादिमस इत्यादिसिद्धिः प्रसंगाः स्यादित्यत आह

इमे चावयवषष्ठीविषयेपि अतएतदोः समाविति सत्यम तिस्रश्चत्वेत्रोपसर्गेन कारस्यत
निर्दिश्यमानयुष्मदस्मदाद्यवयवमपर्यन्तस्यैव युष्मादेशानवतिष्ठमित्यादौ सोपस
गावयवमपर्यन्तस्य निवारणाय पादः पदिति सूत्रे षष्ठीस्थानेति सूत्रे च भाष्ये स्पष्टैषा ॥

इयं चेति यथाद्वास्त्रयानर्थकोवाक्यालंकारे वाकिमत्र प्रमाणमितिसृष्टे लक्ष्यानुरोधस्यैवात्र प्रमाणत्वमिति सू
चयितुं तदर्थकत्वतामाह अतएवेति इदानीं परिभाषायाप्यनस्याः सकयालकल्पितार्थकत्वेनिवसयितुमा
ह पादःपदिति तत्र हि उपधायाह्रस्वस्य उपधाह्रस्वत्वेवक्तव्ये द्विपद्यप्रप्प आदेशा हि सर्वादेशास्व प्रसंगाः
आदेशा हि सर्वादेशाः प्रसज्येत सर्वस्याद्विपाद्धस्य त्रिपाद्धस्य पदआदेशाः प्रसज्येत येनविधिस्तदन्तस्येति
निर्दिश्यतीतिसर्वादेशप्रसंगेन उपधाह्रस्वस्य वह्वव्यवमाशाकिन्ते नहि वक्तव्ये न निर्दिश्यमानस्यादेशावानवा
वक्तव्ये किंकारणं निर्दिश्यमानस्यादेशा भवन्तीति निराकरणं भाष्ये तत्र नासषष्ठीकृते यम षष्ठीस्थानेयोगेति सू
त्रस्थभाष्येन आवर्त्तन इति प्रतीकमुपादाय प्रकटितमथस्मान्नतएवतदावधेयम ॥ ॥

स्थानेन्त्यादेशाभावप्रसंगेन प्रसंगसंगत्या निर्दिश्यमानपरिभाषामूलभूतषष्ठी स्थानेयोगेति सूत्रवदिति नत्वर्हत्रियत्रानेक
विधेति परिभाषामूलभूतस्थानेन्तरतम इति सूत्रोपस्थित्यानुपपन्यायोग्यस्थापकत्वसंगत्या यत्रानेकविधेति परिभाषामवतारय
ति नन्वेवेनत्यादिविति अत्रपरिभाषायां आन्तर्यमित्यस्य साहृश्यमित्यर्थः तच्च स्थानार्थगुणप्रमाणकृतं ग्रहाङ्गविधं नन्वान्तर्यमभ्युपगमा
त तस्यैवानेकविधत्वं दर्शयति अनेकविधमिति अत्रकृतमित्यस्य हेतुरित्यस्यमानमिति स्थाप्येत तन्तर्यमेवं सम्पन्नं कृत
मर्थकृतं गुणकृतं प्रमाणकृतमिति तन्तर्वियमान्तर्यमितियोज्यम् नचात्रप्रमाणं तत्कृतत्वादिविवक्षितव्यम् तस्यचगुणग्रह
णेनैवग्रहणात् श्चयुक्तिर्निरर्थकेतिवाच्यम् गोबलीवर्दन्यायेन श्चयुक्तेः गुणशब्दस्याप्रोक्तविनयानिति क्रमपर्यव्यपरः तेनप्र
मानतर्यमेवेनयोगेनयमित्यादिस्थानेन्तरतमइतिसूत्रस्थभाष्यं णानविरोधः स्वकाराकारयोर्गुणविधौ अन्तरतमाभावप्रसङ्ग

ननुचेतेनत्यादौ हृस्वस्येकारस्यप्रमाणतआन्तर्यादिकारोपिस्यादतआह यत्रानेकविधमान्तर्यं तत्रस्थानतआ
न्तर्यंबलीयः अनेकविधेस्थानार्थगुणप्रमाणकृते अन्तर्माने षष्ठीस्थानेयोगइत्यनयकदेशानुवृत्त्यास्था
नेग्रहणाप्रवर्तमानेपुनस्थानेन्तरतमइति सूत्रेस्थानेग्रहणमेव नहिलतीययाविधिवर्णितमस्यवाक्यभेदे
नस्थानितः सतिसंभवेस्थानतएवान्तरतमइत्यर्थकम् तमपग्रहणमेवानेकविधान्तर्यसत्वागमकम्

स्यमिति नित्यर्थः नचवाच्यानोविशाहीनेमाला स्थानतः स्थानेनेत्यर्थः॥ हर्णवृत्तित्वाभावेनगुणग्रहणेनग्रहणेनस्यादि
तिवाच्यम् तेषांसात्वानत्वाभावेपि ऋषिकारिकेतनमादायगुणत्वात् सचैतत्वैतदत्रत्यमनोरमायांशब्दरत्ने अत्रपरिभाषायांप्र
माणंदर्शयति अत्रमानमित्यादिना पूर्वोक्तवचनविधान्तर्यं सत्रानियामकंस्थानेन्तरतमइतिसूत्रे अन्तरतमस्यत्रतमपग्रहण
मेव यद्येकविधस्थानकृतमेवान्तर्यंस्यात्तदास्थानेन्तरतमइत्येवसिद्धेतमपग्रहणंव्यर्थंस्यात् सतितत्तमपग्रहणाग्रयमर्थो
लभ्यते अयमेतरअयमेतरः तेषामतिशयेनान्तरइति अन्तरतमोभवति अतिशयेनेनमविद्यमानविति अतिशयोर्थो नहियाना
न अतिशायस्यच प्रतियोगिसापेक्षत्वात् अनेकविधान्तर्यसत्वोपपदमद्रयपद्यते अन्यथानदर्थमप्रकृतपपतः स्यादितिभावः ननुप
रिभाषायांस्थानतइत्यस्यपंचम्यर्थकत्वेन नहिकृतेस्थानेइत्यस्यस्थानेनेति तृतीयान्तार्थकल्पनमयुक्तमित्यतआह स्थान

नस्वि परिभाषायांस्थानतइत्यत्रआद्यादित्वात्तसीयेतीतसिकृतेनविरो
यइतिभावः॥

इदानीं चतुर्विधान्तर्यस्य क्रमेणलक्ष्यत्वं दर्शयन्नाह तत्रेत्यादि चतुर्णामध्ये इत्यर्थः अस्याः स्वकपोलकल्पितत्वनि
राशाय प्रामाणिकत्वं दर्शयितुमाह स्थानेन्तरतमसूत्रे भाष्ये इति तत्र हि प्रकृतसूत्रस्य प्रयोजनं उपपाद्य अर्थस्था
नेग्रहणं किमर्थं यत्रानेकमान्तर्यं तत्र स्थानत एवान्तर्यं बलीयो यथा स्यात् किं प्रयोजनम् चेतास्तोता प्रमाणतः अका
रोगुणः प्राप्नोति स्थानतः एकारोकारो इति स्थानग्रहणादेकारौकारौ भवत इत्युक्तम् ए २ ओं ननु स्थानतआन्तर्यस्य
प्राबल्यप्रतिपादनेपि प्रौढः इत्यत्र वत्सौढवानित्यत्रापि प्राहूढोढेति वृद्धिः स्यादित्याशयेन अर्थवत्परिभाषा

तत्र स्थानत आन्तर्यमिको यणचीत्यादौ सिद्धमेव अर्थतः पद्धतिन्यादि स्थान्यर्थाभिधानसमर्थस्यैवा
देशत्वेनेति सिद्धान्ताद्व्यर्थाभिधानसमर्थो यः सत्वस्यादेश इति तत्समानार्थं तत्समानवर्णपादादीनां
ते तत्र श्लोकाहुरितिच गुणतो वाग्घरिरित्यादौ प्रमाणतो अदसो मे इत्यादौ स्थानेन्तरतम इति सूत्रेभा
ष्यसिद्धेषा ॐ १२ ॥ ननु प्रौढवानित्यत्र प्राहूढोढेति वृद्धिः स्यादत आह अर्थवद्ग्रहणे नानर्थकस्य ॥

तत्त्वापद्यत इति नान्विति अस्मामाने च स्वरूपमिति सूत्रमेव तद्धि अग्रेर्ढगित्यादौ लौकिकव्युत्पत्त्या उपस्थितार्थस्य प्रत्य
येन पौर्वापर्यासंभवात् प्रातिपदिकादित्वेनान्वयासंभवाच्च तदर्थकशब्दमात्रग्रहणे प्राप्ते अयमर्थः शब्दस्वरूपेण तु
भयविशिष्टमेव संज्ञि यथा स्यादिति नियमार्थं तत्र स्वशब्दस्यात्मीयत्वे तात्पर्यत्वाद्रूपशब्दस्य च शब्दस्वरूपपरता
न् तथा च सति तदर्थं न इयं सिद्धा अर्थवद्ग्रहणे नानर्थकस्य ग्रहणमिति शब्दस्वरूपमात्रग्रहणे अन्यथानुपपत्त्या

ननुसूत्रमनेनदर्शितः परिभाषायाः सिद्धत्वेपि भाष्यमनेनस्वमन्याख्यानान्नासिध्येतेनैनोभाष्यमनेनाह विशिष्ट-
रूपोपादानेनेति लौकिकव्युत्पन्नविशेषणतयाउपस्थितार्थेकार्यस्यवाहात्तदन्यथानुपपत्त्याशब्दस्वरूपस्यविशेषण
योपस्थितौकार्यबाधाभावात्तत्रप्रकृत्यवधिकतन्त्रत्वपरूपकार्यविधानस्यपपत्तेर्भवतीति उपस्थितार्थस्यविशे
षणतयान्वयसंभवेतत्यागेमानाभावः अयमेवास्यामूलमनेनोभाष्येः स्वमन्याख्यानेपिन दोषइति भावः नन्वेवम

विशिष्टरूपोपादानेउपस्थितार्थस्यविशेषणतयान्वयसंभवेत्यागेमानाभावोऽस्यामूलम् अत्रार्थः
कल्पितान्वयव्यतिरेककल्पितः शास्त्रीयोपिगृह्यतइति ॥


यत्रप्रसिद्धर्थेवालौकिकार्थस्यैवग्रहणेनषट्जातीयेत्यादौतत्रनयापरिभाषयाअतिप्रसंगवारणेनसिध्येदित्यत
आह अर्थइति कल्पितेनेति ननुतत्रप्रकृतिप्रत्ययप्रयोगेतत्तदर्थमानेनतदभावेनतदभावः इतितत्रतत्प्रकृतिप्रत्ययार्थौ।
अध्याहारेनकल्पितौयावन्वयव्यतिरेकौताभ्यांकल्पितोयः प्रकृतिप्रत्ययादिवाच्योऽर्थः शास्त्रीयः अपिशब्दाल्लौकि
कोपिगृह्यतइत्यर्थः अपिशब्दस्यलौकिकार्थसमुच्चायकत्वात् ॐ ॥

44

अत्र भाष्यप्रमाणायति संख्याया अतीति सूत्रे भाष्ये इति तत्र हि उतश्चेति वक्तव्यमिह मा भूत् कतिभिः क्रीतैः कति
किं पुनः कारणं न सिध्यति त्यन्ताया नेति प्रतिषेधः प्राप्नोतीत्याशंक्य अर्थवद्ग्रहणात् सिद्धमिति समाधायानेषा परिभा
षा हि शक्याविज्ञातुं न हि केवलेन प्रत्ययेनार्थो गम्यते केन तर्हि सप्रकृतिकेन कृतार्थैषा परिभाषा भवति यान्येतानि
षट् संख्यानग्रहणानि इति वार्त्तिककृता परिभाषाप्रवृत्तिर्वारिता न वार्त्तिके व्यवस्थापिते तत्र हि वक्तव्यं न वक्तव्यमर्थवद्ग्र
हणात् सिद्धमिति तन्निराकृतम् पुनः ननु चोक्तमिति पूर्वोक्ताशंकाया केवलेनापि प्रत्ययेनार्थो गम्यते कथमक्रमं वय

संख्याया अतीति सूत्रे भाष्यस्य पृष्ठम् इयं च वर्णग्रहणेषु नेत्यल्लस्येत्यत्र भाष्यस्य पृष्ठम् अतपर्वेषावि
शिष्टरूपोपादानविषयेति दृष्टाः


व्यतिरेकाभ्यामित्युक्तम् वर्णग्रहणेषु नेयं प्रवर्त्तत इत्याह इयमिति तत्र लस्येति सूत्रस्थे भाष्यप्रमाणायति लस्येती
ति तत्र हि लादेशे सार्वदेशप्रसंगः लादेशास्सर्वस्य प्रसंगः सर्वस्य लकारस्यादेशः प्राप्नोतीत्याशंक्यार्थवद्ग्रहणात् सिद्ध
मिति समाहिते अर्थवद्ग्रहणात् सिद्धमिति चेन्न वर्णग्रहणेषु वर्णग्रहणमिदम् न चैतद्वर्णग्रहणेषु भवत्यर्थवद्ग्रहणेना
नर्थकस्येति तस्माद्विशिष्टस्य लकारस्य ग्रहणं कर्त्तव्यम् अत एवेति वर्णग्रहणेऽनन्वयप्रवृत्तेरेवेत्यर्थः ॥



वर्णग्रहणे यत्तदयत्नैर्मोग्रमाणान्तरमपि अन्यत्नमाह । एतन्मूलकमिति येन विधिस्तदन्तस्येति सूत्रे भाष्ये अल्लैवानर्थ
केन नान्येनार्थवता केनवत्कथम् किं प्रयोजनं मन्त्रग्रहणे स्त्रीकृत्य ग्रहणं माभूत् नक्रहणे गर्भक्रमहणं माभूत् स्त्रीग्रह
